# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल् – २०१९

| | | |
|---|---|---|
| कक्षा – आचार्य-१ (SEM-2) | प्रश्नपत्रम् –३ | गुणाः - ७० |
| विषयः - नव्यन्यायः | CC- 4.2.5 | समयः – ११:०० त: २:०० |
| दिनाङ्कः – १२-०४-२०१९ | ग्रन्थः – हेत्वाभाससामान्यनिरुक्तिः गादाधरीसहिता | |

**प्रथमान्वितिः (युनिट-१)**

**प्रश्नः -१ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) हेत्वाभासानां निरूपणे बीजं प्रयोजनञ्च व्याख्यात।

(२) 'यथाश्रुतमिदं हेतुदोषाणां लक्षणं, तद्वत्त्वञ्च दुष्टहेतूनामिति' दीधितेः तात्पर्यं व्याख्यात ।

**प्रश्नः -२ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु ।** १०

**(१)** 'अनुमितिकारणीभूताभावप्रतियोगियथार्थज्ञानविषयत्वमि'ति लक्षणस्य दलसार्थक्यं प्रतिपादयन्तु।

**(२)** 'यद्विषयकत्वेन लिङ्गज्ञानस्यानुमितिप्रतिबन्धकत्वं तत्त्वम्' समन्वयं सार्थक्यञ्च प्रतिपादयत।

**द्वितीयान्वितिः (युनिट-२)**

**प्रश्नः -३ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) 'अवच्छेदकत्वं चेहाऽनतिरिक्तवृत्तित्वम्' इति दीधितिं व्याख्यात।

(२) 'अभिधेयत्वं मेयत्वस्य व्यभिचारी'त्यत्र भ्रमत्वं कथमिति वर्णयत।

**प्रश्नः -४ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु ।** १०

(१) 'भ्रमात् प्रतिबन्धेऽपि न क्षति'रिति दीधितेराकाङ्क्षां स्पष्टं व्याख्यात।

(२) विशिष्टद्वयाघटितत्वस्य प्रयोजनं यथाग्रन्थं व्याख्यात।

**तृतीयान्वितिः (युनिट-३)**

**प्रश्नः -५ अधोलिखितयोः प्रश्नयोः एकस्य व्याख्या कार्या।** ०५

(१) 'प्रथम'नच'कल्पं' यथागादाधरि विवृणुत।

(२) स्वावच्छिन्नेति तृतीय'नच' कल्पं व्याख्यात।

**प्रश्नः -६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं लिखतु ।** १०

**(१)** समुदितविशिष्टान्तराघटितत्वं विवृणुत।

**(२)** तृतीय'नच'कल्पे दोषं प्रतिपाद्य चतुर्थ'न च' कल्पं विवृणुत।

## चतुर्थान्वितिः (युनिट-४)

**प्रश्नः -७ एकस्य उत्तरं सन्दर्भसहितं देयम् ।** ०५

(१) 'स्वावच्छिन्ननिरूपितविषयित्वावच्छिन्ने'ति जगदीशकल्पं यथाग्रन्थं व्याख्यात।

(२) हेतुदुष्टत्वं कथमिति स्पष्टयत।

**प्रश्नः -८ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखत ।** १०

(१) 'यादृशधर्मिणि यादृशधर्मवत्ताज्ञानमनुमितिप्रतिबन्धकं तस्य धर्मिणस्तादृशधर्मवत्त्वं हेतुदोष' इति दीधितिं व्याख्यात।

(२) 'निर्वह्निः पर्वतो वह्निमानि'त्यत्र विशिष्य पक्षतावच्छेदकाद्यप्रवेशे नाऽसिद्धिरिति तन्निवेशप्रयोजनं यथाग्रन्थं व्याख्यात।

**प्रश्नः -९ दशप्रश्नानामुत्तराणि एकवाक्येन यच्छन्तु।** १०

(१) विशिष्टान्तराविषयकत्वनिवेशनं कुत्र निवेशनीयम्?

(२) यद्विषयकनिश्चयस्येत्यत्र निश्चय एव तन्निवेश्यमित्यत्र 'तत्' किम्?

(३) 'स्व'पदार्थः कः?

(४) 'विशेषणीयश्च तादृशविशिष्टान्तराघटितत्वेने'ति पङ्क्तिः कस्य?

(५) सद्धेतु-दुष्टहेतुनिरूपणयोः एकं कार्यं किं वर्तते?

(६) कः बाधः?

(७) सपरिकरं किम्?

(८) 'अथ हेत्वाभासाः'इत्यत्र 'अथ'शब्दार्थः कः?

(९) हेत्वाभासनिरूपणे का सङ्गतिः?

(१०) कः दुष्टहेतुः कथ्यते ?

(११) तत्त्वनिर्णयः कः?

(१२) यथाश्रुतमिदं लक्षणं केषाम्?

(१३) हेत्वाभासशब्दस्य का व्युत्पत्तिः?

(१४) दुष्टहेतूनां विभागः कर्तुं शक्यते न वा?

(१५) अनुमितिपदं कस्य परम्?

************

# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा अप्रिल्– २०१९

| | | |
|---|---|---|
| **कक्षा – आचार्य-१ (SEM-2)** | **प्रश्नपत्रम् –३** | **गुणाः – ७०** |
| **विषयः – नव्यन्यायः** | **CC- 4.2.5** | **समयः -** |
| **दिनाङ्कः -** | **ग्रन्थः – हेत्वाभाससामान्यनिरुक्तिः** | |

समाधानानि

प्रश्नः - ९

१. विशेषणतापेक्षया ज्ञानपदार्थे निवेशनमुचितम्।
२. विशिष्टान्तराघटितत्वम्।
३. यद्रूपावच्छन्ने लक्षणं सङ्गमनीयं तदेव स्वपदार्थः।
४. दीधितेः पङ्क्तिः।
५. तत्त्वनिर्णयः विजयश्च।
६. घटत्वावच्छेदेन गुणवत्त्वमेव।
७. व्याप्तिपक्षधर्मताविशिष्टम्।
८. आनन्तर्यार्थः।
९. प्रसङ्गसङ्गतिः।
१०. व्याप्तिपक्षधर्मताविरोधी।
११. प्रमितिकोटिनिश्चयः।
१२. हेतुदोषाणाम्।
१३. हेतुवदाभासन्ते इति हेत्वाभासाः।
१४. न शक्यते।
१५. अनुमितिनिष्ठकार्यतानिरूपकसम्बन्धित्वेनाऽनुमितितत्करणज्ञानपरम्।